आपञ्चदशपर्य्यन्तं बाल्यम् आ त्रिंशद्वर्षं कौमारम्। आ पञ्चाशद्वर्षं यौवनम् ततऊर्द्ध्वं वृद्धत्वमिति वैद्यकोक्तास्ततोऽवस्थाः । जीवमात्रस्य कौमारयौवनवार्द्धकरूपा अप्यवस्थास्तिस्रः एवमन्येषामपि वस्तूनां तत्तत्लक्षणभेदेनावस्थाभेदा उन्नेयाः । सर्व्वेषां पदार्थानां कालादिकृतपरिणामान्तरत्वेऽवस्थेत्युच्यते यथा नायकयोः "श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः । दशाविशेषोयोऽप्राप्तौ पूर्व्वरागः स उच्यते" इत्युपक्रम्य "अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसंलापाश्च । उन्मादोऽथ व्याधिर्जड़ता मृतिरिति दशा कामदशाः" सा०द० उक्ता कामदशा दशविधाः । मल्लिनाथेन तु "दृङ्मनः सङ्गसङ्कल्पौ जागरः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इत्यन्यविधा दश दशा उक्ताः। एवं दैन्यावस्था-कारुण्यावस्था-शोकावस्था-मदावस्थाद्योपि। "रसावस्थः परं भावः स्थायितां प्रतिपद्यते" "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः" इति च सा०द० । "अन्तर्मदावस्थइव द्विपेन्द्रः" रघुः । "अपवित्रः पवित्रो वा सर्व्वावस्थाङ्गतोऽपि" वा पुरा० "तस्मात् सर्व्वास्ववस्थासु मान्याः पूज्याश्च पार्थिवाः" रामा० २आकारे च । "कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुः कृतः" रघुः । [२स्थापने च ।

**अवस्थापन** न० अव+स्था-णिच्-पुक् ल्युट् । १निवेशने

**अवस्थापित** त्रि० अव+स्था-णिच्-कर्म्मणि क्त । १निवेशिते २स्थापिते च । [स्थापयित्वेत्यर्थे अव्य०।

**अवस्थाप्य** त्रि०अव+स्था-णिच्-पुक् यत् । निवेशनीये ल्यप्।

**अवस्थायिन्** त्रि० अव+स्था-णिनि स्त्रियां ङीप् । अवस्थितियुक्ते ।

**अवस्थित** त्रि०अव+स्था-क्त । १वर्त्तमाने २स्थिते "अन्यानपि प्रकुर्व्वीत शुचीन् प्राज्ञानवस्थितान्" "आधिश्चोपनिधिश्चैव" इत्युपक्रमे "दीर्घकालमवस्थितौ" इति च मनुः ।

**अवस्थिति** स्त्री अव+स्था-क्तिन् । अवस्थाने

**अवस्यन्दन** न० अव+स्यन्द्-ल्युट् । क्षरणे गद्दा० क । अवस्यन्दनीयः तद्भवादौ त्रि० ।

**अवस्यु** त्रि० अवोरक्षणम् इच्छति-क्यच्-उन् । रक्षणेच्छायुक्ते । "बभ्रारिरवस्युरसि दुवस्वान्" ता० ब्रा० । "ईलानामवस्यवे यविष्ठ" ऋ०२,६,६, "अवस्यवे स्वरक्षणमिच्छवे" भा०" ।

**अवस्रंसन** न०अव+स्रन्स-ल्युट् । १अधःपतने, २च्युतौ च ।

**अवस्रंसित** त्रि०अव+स्रन्स-णिच्-क्त।१दलिते २पातिते च।

**अवस्रस्** त्रि० अवस्रंसते क्विप् । १भ्रंसनशीले २खण्डिते च।

**अवस्वत्** त्रि० अवोरक्षणमस्त्यस्य मतुप् मस्य वः । रक्षणयुक्ते ।

**अवह** त्रि० न वहति वह-अच् न०ब० । नद्यादेःस्रोतःशून्ये १देशे "सप्ताहतो व्रजन्त्यनवेक्षमाणा यत्रोदकमवहं भवति तत् प्राप्य सकृदुन्मज्ज्यैकं जलाञ्जलिमुत्सृज्य नामगोत्रे गृहीत्वोत्तीर्य्यान्यानि वासांसि परिधायेति" आश्व० गृ० "अवहं यत्र देशे नद्याः स्रोतो नास्ति तदिति" शु०त०रघु०।२तृतीयस्कन्धस्थे वायुभेदे च विष्टतिर्वायुशब्दे।

**अवहत** त्रि० अव+हन-कर्म्मणि क्त। अल्पाघातेन वितुषीकृते

**अवहति** अव+हन-क्तिन् । अवघाते अल्पावघातेन वितुषीकरणार्थे व्यापारे ।

**अवहनन** न०अव+हन भावे ल्युट् । अवघाते धान्यादेः वितुषीकरणसम्पादके १व्यापारे । अवहन्यतेऽनेन शोणितम् करणे ल्युट् । देहस्थे शोणितवहे स्थानभेदे २पुप्फुसे च । "वपावसावहनननाभिः क्लोम यकृत् प्लिहा" या० स्मृ० "अवहननं पुप्फुसः" मिता० ।

**अवहरण** न० अव+हृ-ल्युट् । १स्थानान्तरनयने सैन्यानां युद्धस्थानात् शिविरस्थाने २नयने च ।

**अवहस्त** पु० अवरं हस्तस्य एक० त० । हस्तपृष्ठे हेम० ।

**अवहार** पु० अव+हृ-कर्त्तरि ण । १चौरे, २ग्राहनामके जलजन्तुभेदे (हाङ्गोर) च । भावे घञ् । ३निमन्त्रितविप्रादिभ्यो द्रव्यहरणे।४स्थानान्तरनयने सैन्यानां युद्धस्थानात् ५शिविरनयने च । "ततोऽवहारं सैन्यानां तव तेषाञ्च भारत !" भा०भी०प० ६विरामे ७निवृत्तौ च "क्रियतामवहारोऽस्माद्युद्धाद्ब्राह्मणसंवृतात्" भा०आ०प० ।

**अवहारक** त्रि०अव+हृ-ण्वुल् । १स्थानान्तरनायके २निवारके ३युद्धात् सैन्यादिनिवारके च । (हाङ्गोर)४जलजन्तुभेदे पु० ।

**अवहार्य्य** त्रि०अव+हृ-ण्यत् । अवहरणीये १स्थानान्तरं नेये २अवश्यदेये । "आधिश्चोपनिधिश्चैव न कालात्ययमर्हति अवहार्य्यौ भवेतां तौ दीर्घकालमवस्थितौ" मनुः "अवहार्य्यं भवेच्चैव सान्वयः षट्पणो दमः" मनुः । ३समाप्ये च ।

**अवहालिका** स्त्री अवहलति अधःस्थित्वा ऊर्द्ध्वं स्पृशति अव+हल-विलेखे ण्वुल् टाप् अत इत्त्वम् । प्राचीरे हारावली । ["यच्चापहासार्थमसत्कृतोऽसि" गीता ।

**अवहास** पु० अव+हस-घञ् । १मृदुहासे २उपहासे च ।

**अवहास्य** त्रि० अव+हस कर्म्मणि ण्यत् । उपहास्ये

**अवहित** त्रि० अव+धा-क्त । कृतावधाने सावधाने ।